Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७२२

Title परमहंस सन्यास विधिः

Author ×

Extent ६ पत्राणि Age सं. १७४३

Subject धर्मशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

परमहंससन्यासविधिः

५७१२

4712
F: =9

© Dharmartha Trust J&K. Digitized by eGangotri

संन्यासपद्धतिः ओरिएन्टल विभाग पत्र ८ व.१९ ४०२२

॥ ॐ नमः श्रीशंकराचार्येभ्यो नमः ॥ ॥ अथ परमहंसानां संन्यासविधिं व्याख्यास्यामः ॥ तत्र कृ
च्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ॥ आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ॥ १ ॥ आरू
ढपतितापत्यं कुनखी श्यावदन्तकः ॥ क्षयी हीनाङ्गविकलो नैव संन्यासमर्हति ॥ २ ॥ इति यमः ॥
व्रतयज्ञतपोदानहोमस्वाध्याय। वर्जितं शौचाचारपरिभ्रष्टं संन्यासे नैव कारयेत् ॥ संवत्स
रोषितानां च महापातकिनामपि। व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत् ॥ इति कृतु
दत्तात्रेययोः समानप्रयोगः। चरेद्वा चतुरः कृच्छ्राणि संन्यासं कुर्यादनाश्रमी ॥ आश्रमी कृच्छ्रमेकं
तु कृत्वा संन्यासमर्हति ॥ कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ॥ ॥ अथ संन्यासवि
धिं व्याख्यास्यामः। पूर्वं नान्दीमुखं श्राद्धं दैवं चार्षं दिव्यं। पित्र्यं मातृकं। मानुषं भौति
कं चात्मनश्चान्ते चाष्टौ श्राद्धानि निर्वपेत्। सर्वत्र नान्दीमुखवृद्धिश्राद्धकालः। पूर्वोक्तदेश
समये गत्वा मनःप्रसादकरः। स्वास्तिकोपलिप्ते तत्र श्राद्धद्रव्याणि यवदूर्वाक्षतदधिघृ

© Dharmartha Trust J&K. Digitized by eGangotri

नमधुसाऊग्रस्ततिनिकं कुमंगलाश्चन्याति। नांदीमुखं हेद्रु श्राद्धं समाने कार्यं॥ प्रथमे वै-
श्वदेवं च॥ नित्यसंबंधिनी श्रीविष्णोः पूजां विधाय। यस्य स्मृत्येति। सर्वश्राद्धेषु ब्राह्म-
णयुग्मं॥ सत्यवसु विश्वेदेवो सर्ववृद्धिश्राद्धं वता। अथ श्राद्धकर्म॥ प्रथमे देवश्राद्धे देव-
तात्रयं ब्रह्मविष्णुमहेश्वर॥ द्वितीये ऋषिश्राद्धे देवतात्रयं। ब्रह्मर्षिक्षत्रर्षिदेवर्षयः॥२॥
तृतीये दिव्यश्राद्धे देवतात्रयं वसुरुद्रादित्याः॥३॥ चतुर्थे मनुष्यश्राद्धे देवतात्रयं स-
नकसनातनसनंदनाः॥ प्रजापतयः कुमाराः श्री कुमाराः ब्रह्मणः सुताः॥४॥ पंच-
मे भूतश्राद्धे देवतात्रयं॥ पृथिव्यादीनि पंचमहाभूतानि॥ एकादश चक्षुरादीनि
करणानि॥ चतुर्विधभूतग्रामः॥५॥ षष्ठे पितृश्राद्धे देवतात्रयं। पितृपितामहप्र-
पितामहाः॥६॥ सप्तमे मातृश्राद्धे देवतात्रयं। मातृपितामहीप्रपितामह्यः॥७॥ अ-
ष्टमे मातामहश्राद्धे देवतात्रयं। मातामहप्रमातामहवृद्धप्रमातामहाः॥८॥ नव-

© Dharmartha Trust J&K. Digitized by eGangotri

म-आत्मश्राद्धदेवतात्रयं॥ आत्मपितृपितामहाः॥१॥ सर्वत्र युग्मे ब्राह्मणौ वृद्धिश्राद्धवत्सर्वं क
र्त्तव्यं॥ विवाहोपनादिवत्॥ प्रतिश्राद्धं पिंडत्रयं कुर्य्यात्तथा दद्यात्॥ आदावेतत्पुण्याहवाचनं प
दग्रहासनमात्रम्या॥ प्राणायामः॥ अघेत्यादि प्रयोगं विधाय॥ स्वस्तिवाचनं॥ स्वस्तिनो मिमीतामि
ति तथा शांतिपाठः॥ अघेत्यादि॥ अशेषदुःखनिवृत्तिनिरतिशयानंदपरमपुरुषार्थप्राप्तये प
रहंसाश्रमसंन्यासस्वीकारार्थं श्राद्धमहं करिष्ये॥ ॐकुरुष्व॥ संज्ञास्तार्थमहं श्राद्धं कृत्वा ब्रूताद्धि
ॐतमाः॥ अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्यामि शाश्वतीं॥ गर्भवासभयाद्भीतः स्थापत्रयो
भेवचा॥ गुरुद्वाग्रावचुमिच्छामि परं पदमनामयमिति प्रार्थनानंतरं श्राद्धानि कारयेत्॥ श्राद्धा
नंतरं तस्मिंदिने द्वितीये वा शिखार्थं पंचवषट् केशान वर्जयित्वा मूर्द्धिकेशश्मश्रुलोमादी
नां केश्यापस्थवर्जं वपनं विधाय नखानि कोंत्य यथासंत्त वंस्नानं विधाय॥ कौपिनाछादना

© Dharmartha Trust J&K. Digitized by eGangotri

शिव

घृपसंयुक्तं स्वात्मनः। आचार्यदक्षिणार्थं होमद्रव्याणि च पपकृपघकलशं चासति विज्ञवेपु
त्रदारादीनां नागेन्द्रत्वाधनैः संतर्प्य। स्वनागधनं सज्ञासदारेभ्यो। निवेद्य तदनुज्ञया सर्वमा
पिभ्योद्घात्। असति विरवे स्वात्मनमेव केवलं तेभ्यो निवेदयेत्। अपदेवतापतने यामेवानु
पुलिने गोष्ठेऽरिण्यग्नुचौ देशे पूर्वं होमार्थं द्रव्यमाघौर्यदक्षिणां स्वकौपीनादीकं विवर्णं
चावेणवं दंडं यथोक्तं यथासंकेतं समुद्रकं स्थाप्य कर्म कुर्वीत्॥ देउ संस्कारः। अष्टोत्तरशा
तशंखोदकाभिषेकं कृत्वा। प्रणवेन पुरुषसूक्तेन च। ततः संकर्षणकर्म। आचम्य प्राणायामं
कृत्वाञ्जलिं विधाय मनसा जपेत्। ॐ ब्रह्मणे नमः। ॐ सूर्याय नमः। ॐ सोमाय नमः। ॐ अं
आत्मने नमः। ॐ उं अं अन्तरात्मने नमः। ॐ मं परमात्मने नमः इति॥ सक्तुमुष्टित्रयं गायत्र्याभिमन्त्र्य प्रा ।२।
श्याचम्य। नाभिमभिमंत्रयेत्। ॐ अं आत्मने स्वाहा। ॐ उं अन्तरात्मने स्वाहा। ॐ मं परमात्मने स्वाहा।

तनार

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ प्रजापतये स्वाहा॥ ततः पयोदधिसर्पिरिति त्रिवृदन्नं कृत्वा प्रणवेन त्रिः प्राश्याचम्योपविश्य प्रा
णायाममपूर्वकं जपेत्॥ ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्॥ ॐ भुवः सावित्रीं प्रविश
ामि भर्गो देवस्य धीमहि॥ ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्॥ ॐ भूर्भुवः स्वः
सावित्रीं प्रविशामि॥ ॐ तत्सवितुर्वरेण्यं॰ आशनान्ताचे अग्नौ कुर्यात्॥ स्वगृह्योक्तप्रकारेण
विधिवदग्निं प्रतिष्ठाप्य आज्यसंस्कारं॥ ॐ तन्तुनायावेद्यस्त्वयस्त्रुक स्रुवेण चासंमार्जनप्रतपने। आ।
व्याहृतित्रयो होमः॥ बर्हिर्गृहीतमाज्यं गृहीत्वा समिद्द्वयं पूर्णाहुतिं दद्यात्॥ ॐ भूर्भुवः स्वाहेति॥ त्र
साधानमिति ज्ञातव्यं ततः सायमग्निकार्यं कृत्वा॥ ॐ अग्नये स्वाहा॥ ॐ प्रजापतये स्वाहा॥ पश्चाद्
त्तरेणाग्नेर्दर्भानास्तीर्य होमसाधनानि दर्भादि पात्राण्यासादयित्वा दक्षिणतोऽग्नेर्ब्रह्माणं संस्था
प्य ततो लक्ष्माजिनं वा तद्भावे यत्र तस्मिन् वस्त्रमास्तीर्य तत्रोपविश्य तस्यां रात्रौ जागरणं कुर्यात् प्र
दिव प्रजोस्तवं कुर्यात्॥ अपवासे मुहूर्ते उत्थाय यथाविधि स्नात्वा आचमनं प्राणायामं कृत्वा॥

© Dharmartha Trust J&K. Digitized by eGangotri

।श्रीव

प्रातःसंध्यां विधाय प्रातर्होमः। ॐ सूर्याय स्वाहा। प्रजापतये स्वाहा॥ ॐ प्राणायामत्रयं कृत्वा ध्या
हुतीरूपेन। ततः पुरुषसूक्तेन रूपेन। ततो आज्यहोमं कुर्यात्। तद्यथा। ॐ इंद्राय स्वाहा। ॐ प्रजाप
तये स्वाहा। ॐ विश्वेभ्यो देवेभ्यः स्वाहा। ॐ ब्रह्मणे स्वाहा इति। आहुति चतुष्टयं दत्वा। स्वस्तिवाच
नं ब्राह्मणानां हस्तात् पुण्याहं वाचयित्वा। स्वशाखोक्तविधिना तस्मिन्नग्नौ चरुश्रपणं। ॐ विष्णवे त्वा
जुष्टं निर्वपामि। पात्रासादिर्वैतत्कर्मः॥ पश्चात् आज्यहोमः। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा।
ॐ व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा॥ ततो वीरजाहोमं कुर्यात्। तस्मिन्नेवाग्ना
वाज्येन प्राणापानादिमंत्रैः। तद्यथा॥ ॐ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा॥ प्राणापानादिभ्य इदं न मम। ॐ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्रा
णरेतोबुद्ध्याकूतिःसंकल्पा मे शुध्यंतां ज्योतिरहं विरजाय स्वाहा॥ वागादिभ्य इदं न मम॥
ॐ त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यंतां ज्योतिरहं विरजाय स्वाहा। त्वगादि
भ्य इदं न मम।

३॥

© Dharmartha Trust J&K. Digitized by eGangotri

२६।

ॐ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे शुध्यंतां मे ज्योतिरहं वीरजा०।शि
र आदिभ्य इदं न मम।४।ॐ उत्तिष्ठ पुरुष हरित पिंगल लोहिताक्षि देहि देहि ददापयिता मे शुध्यंतां
ज्योतिरहं वीरजा०।उत्तिष्ठाय इदं न मम।५।पृथिव्यापस्तेजो वायुराकाशा मे शुध्यंतां मे ज्यो०।पृथि
व्यादिभ्य इदं न मम॥६॥शब्दस्पर्शरसरूपगंधा मे शुध्यंतां मे ज्यो०।शब्दादिभ्यः इदं न मम।७।ॐ
मनोवाक्कायकर्माणि मे शुध्यंतां०।मन आदिभ्यो न मम।८।अव्यक्तभावैरहंकारैर्ज्यो०।अ
व्यक्तादिभ्यो न मम॥ आत्मा मे शुध्यंतां०।आत्मन इदं न मम॥ॐ अंतरात्मा मे शुध्यंतां०।अंत
रात्मन इदं न मम॥ॐ परमात्मा मे शुध्यं०।परमात्मन इदं न मम॥ॐ क्षुधे स्वाहा।क्षुधे इदं न
मम।ॐ क्षुत्पिपासाय स्वाहा।ॐ क्षुत्पिपासाय इदं न मम।१४।ॐ विविधै स्वाहा।विविधै इदं
न मम।।१५॥सामविधानाय स्वाहा।इदं सामविधायन मम।१६।कषोत्काय स्वाहा।
इदं कषोत्काय न मम।।१७॥ ॥क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं।अभू

© Dharmartha Trust J&K. Digitized by eGangotri

पाप्मानं स्वाहा॥

ममसमृद्धिं च सर्वाणि नुद मे गृहे दासः स्वाहा॥ ॐ क्षुत्पिपासादिभ्य इदं न मम॥ ॐ अन्नमय प्राणमय
मनोमय विज्ञानमय मानन्दमय मात्मा मे शुध्यन्तां॥ अन्नमयादिभ्य इदं न मम॥ ॐ मे स्वाहा। मे इ
दं न मम॥ स्नो॥ इति विरज्जा होमं कृत्वा॥ ततः अग्नये स्वाहा॥ इदमग्नये न मम॥ ॐ इन्द्राय स्वाहा॥
इदमिन्द्राय न मम॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ आत्मने स्वाहा। अन्तरात्म
ने स्वाहा। परमात्मने स्वाहा। अनन्तः पुरुषसूक्तेन प्रत्यृचं समिद्भिः आकृति जुहुयात् प्रत्यृचं॥
ततः चतुर्गृहीतमाज्यं अनेन मन्त्रेण। ॐ यदि हव्य यत्पूर्वं यज्ञापदि अनापदि। प्रजापतौ तन्म
सि जुहोमि विमुक्ताहं देवकिल्बिषात्स्वाहा। प्रजापतिं ध्यायन् प्रजापतये स्वाहेति॥ ततः
पुरुषसूक्तेन [illegible] जुहोति॥ स्विष्टकृतं जुहोति। अग्नये स्विष्टकृते स्वाहा॥
वसुन्यहति कर्म सत्या समिधं मे करणी पं अन्तेय। वामदेव्यगा॰ अन्तेन॥ आचार्याय अपश्र
स्विने आचार्याय वस्त्रं सुवर्णं धेनुं दक्षिणां च यथासंभावं दद्यात्॥ आचार्यो यदमाप्या ज्ञात

३

४॥

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रः

रग्निकार्यं कृत्वा चोपस्थानं कुर्यात्। समाः सिंचंतु मरुतः समामिंद्रो बृहस्पतिः। समायामग्निः सिं
चंतु। आयुषा च बलेन च। आयुष्मंतं करोतु मां। इत्युपस्थाय। ॐ अयं ते योनिर्ऋत्वियो यतो जातो
अरोचथाः। तं जानन्नग्न आरोहाथा नो वर्द्धया रयिम्। इति या ते अग्ने यज्ञिया तनूस्तये ह्यारोह आत्मा
नमस्येव सू निकृण्वन्नस्मिन्नर्या पुरूणि यज्ञो भूत्वा यज्ञमासिद स्वां योनिं जातवेदो भवा आजा
यमानः स क्षय एहि इति रुचा स्वां त्रिरावर्त्य आत्मन्यग्निं समारोपयेत्। हस्ता स्वाग्र दत्वा अग्नि
ज्वालां घ्राणयेत्। इत्यग्न्युपस्थानम् आचम्य॥ ॐ इह ह्यग्ने सदेहा पूर्वी शरीरमनुसंचरस्व मा रंचामपहा
यपरागां सामपहाय परागाः। इत्यग्निं विसर्जयेत्। ततः स्वेभ्यः पुत्रेभ्यः आशिषं दद्यात्। सर्वे
नंदंतु वेदाढ्याः सर्वे नंदंतु सोमपाः। सर्वे नंदंतु सुखं दृष्ट्वा सर्वे नंदंतु निष्कृताः। पश्चाद्योग्यं पुत्रं प्र
ति कथयति। त्वं ब्रह्म त्वं यज्ञस्त्वं लोकस्त्वं सर्वम् इति। स पुत्रः पितरं प्रत्याह अहं ब्रह्म अहं यज्ञः
अहं लोकः अहं सर्वम् इति। यद्यपुत्रकस्त्रिर्दिशो वाचयति। ता हि अहं ब्रह्म अहं यज्ञः अहं लोकः

© Dharmartha Trust J&K. Digitized by eGangotri

शिव

अहं सर्वः। इति स्वयमेव जपेत्। शिवस्य स्वस्तु सर्वेभ्यः। अपबुद्धि विसर्जने। एवं तु सर्वे श्रीगुरु
प्रसादात्। संसारस्य पारमहं गंतुकामोऽस्मि। ममसर्वेषां ममतां त्यक्त्वा। पुत्रैषणा। वित्तैषणा।
लोकैषणा वस्तु का। युष्माभिः। ममोपरि ममता न कर्तव्या। विघ्नो न कर्तव्यः। पूर्णांजलिमंत्र
रूपेनाभिमंत्र्य। आशुः शिशानो इत्यनुवाकेन। ॐ सर्वाभ्यो देवताभ्यः स्वाहा। अप अपो समी
गत्वा तिष्यादौ श्रवणपूर्वकं स्नान संध्या वंदनादिकं कृत्वा। संन्यासं करोमीति संकल्प्य। अपां
पूर्णांजुलीं गृहीत्वा। ॐ एष ह वा अग्निः सूर्यः प्राणं गच्छ स्वाहा। ॐ योनिं गच्छ स्वाहा। ॐ आपो वै ग
च्छ स्वाहा। इत्यंजलित्रयं जले कृत्वा। पुत्रैषणा वित्तैषणा लोकैषणाः सर्वैषणा मया परित्यक्ताः।।
अभयं सर्वभूतेभ्यो मत्तः सकाशाय स्वाहा। इत्यपां पूर्णांजलिं जले प्रक्षिपेत्। यच्छति अभ
यं सर्वभूतेभ्यः स्वाहेति। पश्चात् सर्वं ब्रह्मेति विचारणीयो नान्यत्। सर्वं खल्विदं ब्रह्म इति
श्रुतेः। पश्चात् मानस ब्रह्मांजलिं चापरमेति। ॐ यत्किंचिद् धनं कर्म कृतमज्ञानतो मया।

स्वा

५

© Dharmartha Trust J&K. Digitized by eGangotri

प्रमादालस्यदोषोत्थं तत्सर्वं संत्यजाम्यहं । व्यक्तः सर्वो विशुद्धात्मा गतस्नेहस्तु नाशुन ।। काम भो
गादिकं सर्वं सत्यक्तं वेदमुदाहरेत् । एषत्यक्तास्म्यहं सर्वकामभोगसुखा · दिकं । रोषं तोषं वि
वादं वा । धूपगंधमाल्यानुलेपनं । भूषणं नर्तनं गेयं दानमादायमेव वा । नमस्कारं जपं होमं याश्च
नित्याक्रिया मम । नित्यं नैमित्तिकं काम्यं वर्णधर्माश्रमाश्च ये । युगधर्माश्च ये केचित्त्यक्ता शुभ
फलानि वा । करणं कार्यकर्तृत्वं कर्तारं करणैः सह । सर्वमेव परित्यज्य बुध्याधिष्ठितमानसः ।
आत्मानं सर्वभूतस्थं सर्वभूतानि चात्मनि । चतुर्विधस्य सत्त्वात्मा । भूतग्रामस्य निस्पृहः ॥
कृतं वकारितं चैव यदीप्सितं चानुमोदितं । संचिंत्य सर्वभूतेभ्यो दद्याद्भयदक्षिणां । पङ्क्त्यां करत्यां
विहरन्भोनारं वा क्लिश्यमानसैः । करिष्ये प्राणिनां पीडां प्रप्राणिनः संतु निर्भयाः ॥ देहे ऽलंबरे तु
मो । स्थावरान्जंगमाश्च ये । पाषाणसंपुटे येव श्लेषविश्लेषकाश्च ये । लोभवस्त्रादिधान्येषु शायने

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यासनेषु ये ते स्वयं तु विबुध्यंति मुखं मत्तो नयं विना ॥ दृष्ट्वैवं सर्वभूतेभ्यः सर्वज्ञानयदक्षिणा ।
करुणामैत्रदृष्टिश्च प्रज्ञादृष्टिं च संस्थितः ॥ ततो विचिंतयेद्धीमां सर्वमात्मनि संस्थितं ॥ कोऽस्ति मि
न्नास्ति कश्चिन्मे बुद्धेरेकोऽहमच्युतः ॥ संसारादित्यतप्तोऽहं विद्युष्टदेहमानसः ब्रह्मज्ञान्यानां बु
शीतेन सिंचन् महावाक्यवारिणा ॥ न मेऽस्ति बांधवः कश्चिन्मुक्तात्मा न परावरं ॥ आत्मैव परो बं
धुरुद्बोधः एष तोयतः ॥ इंद्रियैर्विषयैः सर्वैर्मध्यास्थं न बहिः स्थितैः ॥ विश्वेश्वरोऽहमात्मा वै
सर्वज्ञः सर्वतोमुखः ॥ त्यक्त्वा रनयेद्दत्वा सर्वज्ञमीश्वरं ॥ व्यक्ताव्यक्तपरं शुद्धं सत्यं निश्चित्य
ते सततः ॥ एतान्मे षान्भुवन्शुद्धो दिशश्चैव च लोकपनाः ॥ आदित्यचंद्रावनिलोऽनलश्च द्यौ
र्भुमिरापो हृदयं मनश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मोऽपि जानाति नरस्य वृत्तिं ॥ आदि
त्यचंद्राद्यैः सर्वैर्लोकपालैः सर्वादिदेवताश्च स्वकर्मसाक्षिणो निखिलान् गुर्वादीन् ब्रह्माणी

© Dharmartha Trust J&K. Digitized by eGangotri

न्या

स्यसत्रासस्सान्हितेन ध्यायेत्॥ ततो नाभिप्रमाणं जलं प्रविश्य प्राङ्मुखं न गायत्रीं प्रविशामी
ति संकल्प्य॥ ॐ भूः सावित्रीं प्रविशामि। तत्सवितुर्वरेण्यं। ॐ भुवः सावित्रीं प्रविशामि। भर्गो दे
वस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्। ॐ भूर्भुवःस्वः सावित्रीं प्रवि
शामि तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ ॐ परोरजसे सावदोम् इति।
जपित्वा। स्नात्वा। त्वाचम्य। प्राणानायम्य आत्मानं ध्यात्वा जले स्थितः। तरत्स मंदी धावति धा
रा सुतस्यांधसः। तरत्स मंदी धावति। उस्रा वेद वसूनां मर्त्तस्य देव्यवसः। तरत्स मंदी धावति। ध्व
स्रयोः पुरुषंत्योरासहस्राणि दद्महे। तरत्स मंदी धावति। ॐ आ ययोस्त्रिंशतं तना सहस्राणि
च दद्महे। तरत्स मंदी धावति। इति जपेत्। अथादित्यमुपतिष्ठेत्। पुत्रैषणायाश्च वित्तैषणा
याश्च लोकैषणायाश्च व्युत्थितोऽहं। [illegible] त्यक्त्वा प्रैषोच्चारणं कुर्यात्॥ ॐ भूः संन्यस्तं मया।
ॐ भुवः संन्यस्तं मया। ॐ स्वः संन्यस्तं मया। ॐ भूर्भुवःस्वः संन्यस्तं मया। इति त्रीन्मंदमध्यम[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

त्रैमो नमस्यरेणे क्षौ। ॐ अनयं सर्वं चूले स्योमनः स्वाहा। इति गाव्यां दिशि। अपां पूर्णेऽञ्जलिं प्रक्षिपेत्।
ततस्तूष्णीं शिखावर्जं स्नापितान्केशानुत्याय विसृज्याय ज्ञोपवितमस्थित्वा। एकीकृत्य प्रदेशाप्स्व
प्सु प्रक्षिपेत्। ॐ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा। ॐ भूः स्वाहा। इत्य
प्सु जुहोति। स्नात्वा कुर्यात्। ततो निर्गत्य उदङ्मुखः सन् जलाशये एवं वस्त्रादिकं त्यक्त्वा। यथाजातरू
पधरः। दिगम्बरो भूत्वा। उदङ्मुखो मह्यां पञ्च सप्तपदानि गच्छेत्। तत आचार्यो दण्डवस्त्राणि पत्य
अतिप्रियवचनैर्लौकव्यवहारार्थं लज्जानिवारणार्थं चाकोपीनं छादनार्थं वासो युक्तं करोति।
ज्ञो सर्पनिवारणार्थं दण्डयुक्तं च करोति। स्वयं कोपीनादिकं धृत्वा। काषायवाससा बीजस्याप धृ
रिधाय आचम्य दण्डप्रार्थनां कुर्यात्। ॐ वार्त्रघ्न शर्म मे भव यत्पापं तन्निवारय। विष्णुहस्तेय
पावकं श्वेतं शिवं करे यथा। इन्द्रहस्ते यथा वज्रं तथा दण्ड भवाघमो। इति दण्डप्रार्थनां कृत्वा। ॐ इन्द्र १७॥
इन्द्रस्य वज्रोऽसि सखा मां गोपाय योऽरः सखायो सौ इन्द्रस्य वज्रोऽसीत्यनेन मन्त्रेण दण्डग्रहणं कुर्यात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॥१

मु ३

यावत् गुरुसमीपे गमनं तावद्विष्णुस्मरणंपरो न वेत्। ततो दंडकमंडलुं वस्त्रसंयुक्तो गुरुसमीपं ग
त्वा नमस्कारान् कृत्वा। गुरुः आसने नोपविशाकरसंपुटः कृत्वा गुरुप्रार्थनां कुर्यात्॥ श्रीगुरो भ
गवन् त्वमस्माद्घोरात् संसारात् मां समुद्धर। असत्कर्मजन्मजरामरणादि निरपारं संसारमात्म
ज्ञानेन मां तारय भगवन्। नूतनानामनयं दत्वा युष्मच्छरणमागतः। त्वाहि मां योगिनामीशाना
न्यस्त्राणाद्य्रिमे प्रत्नो॥ निस्पृहः सर्वतः शांतः सर्वविद्याविशारदः। सर्वसंशयसंछेत्ता नरसौ
गुरुरादुर्यो। तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं॥ शाब्दे परे च [illegible] च निष्णातं ब्रह्मण्युपश
मा श्रयां। त्रायस्व योजगन्नाथ गुरो। संसारवह्निना दग्धं मां कालदष्टं च त्वामहं शरणंगतः।
अघापि नृतिनूतानि नहिंस्यामि कदाचन। महाव्रतं वरिष्यामि कर्मणा मनसा गिरा॥
अविद्याकृष्णसर्पेण दष्टं त्वं द्विषपीडितं। तव वाक्यामृतपानेन संजीवय वपुर्मृतं॥ इति गु
रुप्रार्थना॥ ॥अथ पश्चात्सुखोपविष्टाय शिष्याय उदङ्मुखोपविष्टो गुरुर्महावाक्यानुप

© Dharmartha Trust J&K. Digitized by eGangotri

दिशति। एवं चोपदिशति नाम चापंचीकृतवाक्यार्थाभिधानं करोति। एवं संन्यासं च॥ इति श्री
गुरूणां नमस्कारं। गुरुसेवां कुर्यात्॥ इति श्रीपरमहंसपरिव्राजकाचार्यविरचित परम
हंसविधिः समाप्तः॥ ॥ हस्तौ रुद्ध्वा गुरुस्थाता गुरोरुद्धेन कथनात्। तस्मात्सर्वप्रकारेण गुरु
मेव प्रसादयेत्॥ ॥ अथासौ गुरुस्तारकं ब्रह्म व्याचष्टे इति बद्धा परिशिष्टो शिष्यश्चोपवि
ष्टस्य दक्षिणकर्णे उद्दयुस्त्वोपविष्टो गुरुः नित्यशुद्धबुद्धमुक्तसत्यपरमानंदाद्वयब्रह्मप्र
तिपादकं प्रणवमुपदिशेत्। प्रणवस्यार्थमाचार्यवचनेन बोधयेत्। आचार्यवचनं पंची
करणं। अथातः परिव्राट्॥ मुंडो निर्मुमोऽपरिग्रहः। काषायवासा वाऽज्ञः नःकायदंडो नूत्या
नामद्वेही उदरपात्रो नैष्ठ्याशी सर्ववर्णं घ्नति शास्त्रपतितवर्जमयज्ञोपवीती शौचनिष्ठः नि
त्यशुचिः। अमनित्यत्यनिंदास्तुतिसमो नुतेषु मौनी दृढधर्मी नित्यध्यानयोगपरः स्थिरधीः
आत्मदृष्टः। आत्मनिष्ठः। आत्मप्रतिष्ठः। अयमात्मा ब्रह्मेत्यादि ब्रह्मविदाज्ञोती तिविज्ञाय

© Dharmartha Trust J&K. Digitized by eGangotri

तोऽङ्कदेहोऽन्योऽतिकोनात्मा।। क्व चात्माप्रस्तुते परः। कस्य के पतिपुत्राद्या मोह एव हि कारणं।। आ
तुरस्य तु नीतस्य संन्यासं प्राकृतो गिरा।। न तस्य विधयः सन्ति शाक्यवस्थानुरूपतः। प्रैषमात्रे
ण संन्यासः कृतोऽथ विधिवद्भवेत्।। उत्पन्ने संकटे घोरे चोरव्याघ्रादिनिर्हते। तस्या विधयः
सन्ति कृतोऽस्य विधिवद्भवेत्।। संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि। अश्वमेधसहस्र
स्य फलमाप्नोति मानवः। एवं यः संन्यसेत्तु विज्ञाय यथाशास्त्रे यथाविधिः। ब्रह्मलोकमवाप्नोति
यावदाकृतसंप्लवं। आतुराणां विशेषोऽस्ति न विधिर्नौर्ध्वदैहिकक्रिया। प्रैषमात्रेण संन्यासो ह्यातु
राणां विधीयते। शेषं वित्तं त्यजेद्विप्रो धनधान्यादिकं चयन्।। अत्यागात्सर्ववित्तस्य संन्यासो
निष्फलो भवेत्। एकैकं वर्द्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत्। अमावास्यां न भुञ्जीत एवैतद्भ्र
न्द्रायणो विधिः। मधुमासे नवे दुःखं माघमासे रतेसंचयः। मरणं भवति ज्येष्ठे वाषाढे बंधुना
शनं। समृद्धिः श्रावणे नूनं भी न भवेद्भाद्रपदे ह्यः प्रज्ञा नाम आश्विने मासि सर्वतः शुभमेव हि।।

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानं स्यात् कार्त्तिके सौम्यं मार्गशीर्षे न वत्स्यपि। पौषे स्नानं द्वयो माघे। नवे नमेधाविवर्द्धनं। फाल्गुने विसमृद्धिः स्यान्मलमासे पि वर्जयेत्॥ इति मासशुद्धिः॥ हरिद्रानंदः। शंकरानंदः। सदानंदः। नित्यानंदः। हरिहरब्रह्म। ज्ञानब्रह्म। विज्ञानब्रह्म। अद्वैतब्रह्म। ॐ ह्रीं। अद्वयाराम। अद्वय। गोविंद। अद्वय। अद्वयब्रह्म। प्रकाशब्रह्म। परमानंद। अद्वयेत्यादिवाक्यानामानि। तीर्थाश्रमवनारण्य। गिरिसागरपर्वता। सरस्वती भारती चैव पुरि नामानि वै दश॥ इति योगपट्टनामानि। तीर्थविवाहे यात्रायां संग्रामे देशविप्लवे। नगग्रामदाहे वा स्पृष्टास्पृष्टे न दुष्यति॥ बोधान्य। अपतानरुते नान् लोकायतिककापिलान्। विकर्मस्थान् द्विजान् स्पृष्ट्वा सचैलमाविशेत्॥

समाप्तं॥ ॥शिवमस्तु॥ शुभं भवतु॥ श्रीश्रीश्रीविश्वेश्वराय नमः॥ ॐ॥

संवत् १७४३ वर्षे श्रावणशुद ८ रवौ॥ नाउ सुत हरीश्वरेण वाराणस्यां मध्ये लिखितं परोपकारार्थ। लेखकपाठकयोः कल्याणं भूयात्॥ कृ

पुत्रस्यैश्वर्ये पितावसेदिति श्रुतेः। श्रा

स्वात्यनुज्ञापि द्रष्टव्यतो शुभं भूयात्॥

© Dharmartha Trust J&K. Digitized by eGangotri